# ॥ चाक्षुष्मती स्तोत्रम् ॥

ॐ चक्षुश्चक्षुः तेजस्थिरो भव, मां पाहि पाहि, त्वरितं चक्षुरोगान् प्रशमय प्रशमय, मम जातरूपं तेजो दर्शय दर्शय, यथाहमन्धो न स्यां तथा कल्पय कल्पय, कृपया कल्याणं कुरु कुरु, मम यानि यानि पूर्वजन्मोपार्जितानि चक्षुप्रतिरोधक दुष्कृतानि, तानि सर्वाणि निर्मूलय निर्मूलय ।

ॐ नमश्चक्षुः तेजोदात्रे दिव्यभास्कराय ।

ॐ नमः करुणाकरायामृताय ।

ॐ नमो भगवते श्रीसूर्याय अक्षितेजसे नमः ।

ॐ खेचराय नमः । ॐ महासेनाय नमः ।

ॐ तमसे नमः । ॐ रजसे नमः । ॐ सत्त्वाय नमः ।

ॐ असतो मा सद्गमय । ॐ तमसो मा ज्योतिर्गमय ।ॐ मृत्योर्माऽमृतं गमय ।

उष्णो भगवान् शुचिरूपः । हंसो भगवान् प्रतिरूपः ।

सहस्ररश्मिः शतधा वर्तमानः पुरः प्रजानामुदयत्येष सूर्यः ।

ॐ नमो भगवते श्रीसूर्याय आदित्याय अक्षितेजसे अहो वाहिनि स्वाहा ।

ॐ वयः सुपर्णा उपसेदुरिन्द्रं प्रियमेधा ऋषयो नाथमानाः ।

अप ध्वान्तमूर्णुहि पूर्धि चक्षुः मुमुग्ध्यस्मान् निधयेव बद्धान् ।

ॐ पुण्डरीकाक्षाय नमः । ॐ पुष्करेक्षणाय नमः ।

ॐ कमलेक्षणाय नमः । ॐ विश्वरूपाय नमः ।

ॐ श्रीमहाविष्णवे नमः । ॐ सूर्यनारायणाय नमः ।

ॐ शान्तिः शान्तिः शान्तिः ॥

**.. cākṣuṣmatī stōtram ..**

oṃ cakṣuścakṣuḥ tējasthirō bhava, māṁ pāhi pāhi, tvaritaṁ cakṣurōgān praśamaya praśamaya, mama jātarūpaṁ tējō darśaya darśaya, yathāhamandhō na syāṁ tathā kalpaya kalpaya, kr̥payā kalyāṇaṁ kuru kuru, mama yāni yāni pūrvajanmōpārjitāni cakṣupratirōdhaka duṣkr̥tāni, tāni sarvāṇi nirmūlaya nirmūlaya .

oṃ namaścakṣuḥ tējōdātrē divyabhāskarāya .

oṃ namaḥ karuṇākarāyāmr̥tāya .

oṃ namō bhagavatē śrīsūryāya akṣitējasē namaḥ .

oṃ khēcarāya namaḥ . oṃ mahāsēnāya namaḥ .

oṃ tamasē namaḥ . oṃ rajasē namaḥ . oṃ sattvāya namaḥ .

oṃ asatō mā sadgamaya . oṃ tamasō mā jyōtirgamaya .oṃ mr̥tyōrmā'mr̥taṁ gamaya .

uṣṇō bhagavān śucirūpaḥ . haṁsō bhagavān pratirūpaḥ .

sahasraraśmiḥ śatadhā vartamānaḥ puraḥ prajānāmudayatyēṣa sūryaḥ .

oṃ namō bhagavatē śrīsūryāya ādityāya akṣitējasē ahō vāhini svāhā .

oṃ vayaḥ suparṇā upasēdurindraṁ priyamēdhā r̥ṣayō nāthamānāḥ .

apa dhvāntamūrṇuhi pūrdhi cakṣuḥ mumugdhyasmān nidhayēva baddhān .

oṃ puṇḍarīkākṣāya namaḥ . oṃ puṣkarēkṣaṇāya namaḥ .

oṃ kamalēkṣaṇāya namaḥ . oṃ viśvarūpāya namaḥ .

oṃ śrīmahāviṣṇavē namaḥ . oṃ sūryanārāyaṇāya namaḥ .

oṃ śāntiḥ śāntiḥ śāntiḥ ..

www.kamakotimandali.com